श्री बगळामुखी वर्ण कवचं

श्री बगळामुखी वर्ण कवचं

अस्य श्रीबगळामुखीवर्णकवचस्य श्रीपरमेश्वरऋषिः अनुष्टुप् छंदः श्रीबगलामुखी देवता ॐ बीजं ह्लीं शक्तिः स्वाहा कीलकं बगळाप्रसाद सिद्ध्यर्थे जपे विनियोगः |

ध्यानं |
जिह्वाग्रमादाय करेण देवीं
वामेन शत्रून् परिपीडयंतीं |
गदाभिघातेन च दक्षिणेन
पीतांबराढ्यां द्विभुजां नमामि ||

कवचं |
प्रणवो मे शिरः पातु ललाटे ह्लीं सदाऽवतु |
बकारो भ्रूयुगं पातु गकारः पातु लोचने || 1 ||

लकारः पातु मे जिह्वां मुकारं पातु मे श्रुतिं |
खिकारं पातु मे तालु सकारं चिबुकं तथा || 2 ||

वकारः पातु मे कंठं स्कंधौ पातु दकारकः |
बाहू ष्टकारकः पातु करौ पातु नकारकः || 3 ||

स्तनौ वकारकः पातु चकारो हृदयं मम |
मकारः पातु मे नाभौ खकारो जठरं मम || 4 ||

कुक्षिं पकारकः पातु दकारः पातु मे कटिं |
स्तकारो जघनं पातु भकारः पातु मे गुदं || 5 ||

गुह्यं यकारकः पातु जकारोऽवतु जानुनी |
ऊरू ह्लकारकः पातु गुल्फौ पातु ककारकः || 6 ||

पादौ लकारकः पातु यकारो स्छिति सर्वदा |
बुकारः पातु रोमाणि धिकारस्तु त्वचं तथा || 7 ||

विकारः पातु सर्वांगे नकारः पातु सर्वदा |
प्राच्यां शकारकः पातु दक्षिणाश्यां यकारकः || 8 ||

वारुणीं ह्रीं सदा पातु कौबेर्यां प्रणवेन तु |
भूमौ स्वकारकः पातु हकारोर्ध्वं सदाऽवतु || 9 ||

ब्रह्मास्त्रदेवता पातु सर्वांगे सर्वसंधिषु |
इति ते कथितं देवि दिव्यमक्षरपंजरं || 10 ||

आयुरारोग्य सिद्ध्यर्थं महदैश्वर्यदायकं |
लिखित्वा ताडपत्रे तु कंठे बाहौ च धारयेत् || 11 ||

देवासुरपिशाचेभ्यो भयं तस्य न हि क्वचित् |
कर्मणेन संदर्शो त्रिषुलोकेषु सिद्ध्यते || 12 ||

महाभये राजे तु शतवारं पठेद्यहं |
गृहे रणे विवादे च सर्वापत्ति विमुच्यते || 13 ||

एतत्कवचमज्ञात्वा यो ब्रह्मास्त्रमुपासते |
न तस्य सिद्ध्यते मंत्रः कल्पकोटिशतैरपि || 14 ||

इति श्री ईश्वरपार्वतिसंवादे बगळावर्णकवचं संपूर्णं |